CAMBRIDGE INTERNATIONAL EXAMINATIONS
**General Certificate of Education ADVANCED SUBSIDIARY Level**

# SANSKRIT 8608/1

PAPER 1. Prescribed Texts and Essays

**MAY/ JUNE 2015**

Additional materials:
Answer paper

**TIME** 2 hours

## INSTRUCTIONS TO CANDIDATES

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer **all** questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

## INFORMATION FOR CANDIDATES

The maximum number of marks for each question is shown in brackets [ ] at the end of each question or part question.

**This question paper consists of 7 printed pages and 1 blank page.**

## Section A

Prescribed Texts

**1** *Hitopadeśa*

**(a)** अनन्तरं शिलीमुखो नाम शशकः सर्वानाहूय चिन्तयामास। अनेन गजयूथेन पिपासाकुलितेन प्रत्यहमेवात्रागन्तव्यम्। अतो विनङ्क्ष्यत्यस्मत्कुलम्। अथ विजयो नाम वृद्धशशकोऽवदत्। मा विषीदत। प्रतीकारो मया कर्तव्यः। इति प्रतिज्ञाय चलितः। गच्छता च तेनालोचितम्। कथं मया गजयूथपनिकटे गत्वा वक्तव्यम्। यतः।

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजंगमः।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः॥

अतोऽहं पर्वतशिखरमारुह्य यूथनाथमभिवादयामि। तथानुष्ठिते सति यूथनाथ उवाच। कस्त्वम्। कुतः समायातः। स ब्रूते। दूतोऽहं भगवता चन्द्रेण प्रेषितः। यूथपतिराह। कार्यमुच्यताम्।

*from 'The Elephant, the Hares and the Moon'*

**(i)** Translate lines 4 to 7, *'gacchatā .... durjanaḥ'*. [6]

**(ii)** Translate and state the types of the following compounds:
**(a)** *'parvataśikharam'* (line 8)
**(b)** *'yūthapatiḥ'* (line 10) [4]

**(iii)** Scan the verse on lines 6 and 7 and state the metre. [5]

**(b)** मत्स्या ऊचुः। भो बक। अस्माकं कुत्र रक्षणोपायः। बको ब्रूते। अस्ति रक्षणहेतुर्जलाशयान्तरम्। तत्राहमेकैकशो युष्मान्नयामि। मत्स्यैरपि भयादुक्तम्। एवमस्तु। ततोऽसौ दुष्टबकस्तान्मत्स्यानेकैकान्नीत्वा कस्मिंश्चिद्देशे खादित्वा पुनरागत्य वदति। ते मया जलाशयान्तरे स्थापिताः। अनन्तरं कुलीरस्तमुवाच। भो बक। मामपि तत्र नय। ततो बकोऽप्यपूर्वकुलीरमांसार्थी सादरं तं नीत्वा स्थले धृतवान्। कुलीरोऽपि मत्स्यकङ्कालाकीर्णां भूमिं दृष्ट्वाचिन्तयत्। हा हतोऽस्मि मन्दभाग्यः। भवतु। इदानीं समयोचितं व्यवहरामि। यतः।

तावद्भयात्तु भेतव्यं यावद्भयमनागतम्।
आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत्॥

*from 'The Heron, the Fishes and the Crab'*

**(i)** Translate lines 4 to 7, *'te mayā .... acintayat'*. [6]

**(ii)** Translate and state the types of the following compounds:
**(a)** *'rakṣaṇahetuḥ'* (line 2)
**(b)** *'duṣṭabakaḥ'* (line 3)
**(c)** '*mandabhāgyaḥ'* (line 8) [6]

**(iii)** Explain the final verse, how it fits the context of the story, and the lesson it teaches. [3]

[Total: 15 + 15 = 30 marks]

**[Turn over**

**2.** *Rāmāyaṇa of Vālmīki*

**(a)** धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥

सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥

*from Bālakāṇḍa, Chap. 1 vv 12 to 16*

**(i)** Translate lines 1 to 4, *'dharmajñaḥ .... parirakṣitā'*. [6]

**(ii)** Translate and name the types of the following compounds:
**(a)** *'svajanasya'* (line 5)
**(b)** *'adīnātmā'* (line 8)
**(c)** *'priyadarśanaḥ'* (line 10) [6]

**(iii)** State who is speaking in these verses, to whom and about whom. [2]

(b) गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण।
आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः॥

पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम्।
न त्वहं राघवादन्यं कदापि पुरुषं स्पृशे॥

इति लक्ष्मणमाश्रुत्य सीता शोकसमन्विता।
पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह॥

तामार्तरूपां विमना रुदन्तीं सौमित्रिरालोक्य विशालनेत्राम्।
आश्वासयामास न चैव भर्तुस्तं भ्रातरं किंचिदुवाच सीता॥

ततस्तु सीतामभिवाद्य लक्ष्मणः कृताञ्जलिः किंचिदभिप्रणम्य।
अवेक्षमाणो बहुशः स मैथिलीं जगाम रामस्य समीपमात्मवान्॥

*from Araṇyakāṇḍa, Chap. 45 vv 36 to 40*

**(i)** Translate lines 1 to 6, *'godāvarīṃ .... prajaghāna ha'.* [8]

**(ii)** Translate and name the types of the following compounds:
**(a)** *'ārtarūpām'* (line 7)
**(b)** *'viśālanetrām'* (line 7)
**(c)** *'kṛtāñjaliḥ'* (line 9) [6]

**(iii)** Explain how the scene depicted arose and what it led to. [2]

[Total: 14 + 16 = 30 marks]

**3.** *Bhagavad Gītā*

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पांडवाश्चैव किमकुर्वत संजय ॥

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ।
संगात्संजायते कामः कामात्क्रोधोऽभिजायते ॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥

*Chap. 1, v 1; Chap. 2, vv 62 and 63; Chap. 3, v 8*

**(i)** Translate lines 3 to 6, *'dhyāyato .... praṇaśyati'.* [8]

**(ii)** Translate and name the types of the following compounds:
**(a)** *'dharmakṣetre'* (line 1)
**(b)** *'akarmaṇaḥ'* (line 7)
**(c)** *'śarīrayātrā'* (line 8) [6]

**(iii)** Taking your cue from the first of the above verses, tell the story of the Bhagavad Gītā, naming the main participants. Say why the spiritual counselling was given and what the result was. [3]

**(iv)** The final verse above speaks of action. Using this and your general knowledge of the the whole text, explain the Bhagavad Gītā's teaching about action. [3]

[Total: 20 marks]

## Section B

Essays

**1.** Write a short essay on **one** of the following:

**(a)** How does the *Śrīmad Bhāgavatam* portray Kṛṣṇa as a boy?

**(b)** Discuss the theme of love in the sections of the *Śrīmad Bhāgavatam* that you have read.

[ 20 marks ]

**2.** Write a short essay on **one** of the following:

**(a)** Is Manu a lawgiver or someone offering advice?

**(b)** If a system of government were based on the *Laws of Manu*, what form do you suppose it would take?

[ 20 marks ]

**BLANK PAGE**